# Prakritikritam Shri Krishna Stotram

# प्रकृतिकृतं श्रीकृष्णस्तोत्रम्

## Document Information

Text title : Prakritikritam Shri Krishna Stotram

File name : prakRRitikRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | brahmakhaNDa | adhyAya 3/77-84||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

# प्रकृतिकृतं श्रीकृष्णस्तोत्रम्

प्रकृतिरुवाच ।
अहं प्रकृतिरीशाना सर्वेशा सर्वरूपिणी ।
सर्वशक्तिस्वरूपा च मया च शक्तिमज्जगत् ॥ ७७॥

त्वया सृष्टा न स्वतन्त्रा त्वमेव जगतां पतिः ।
गतिश्च पाता स्रष्टा च संहर्त्ता च पुनर्विधिः ॥ ७८॥

स्रष्टुं स्रष्टा च संहर्तुं संहर्ता वेधसा विधिः ।
परमानन्दरूपं त्वां वन्दे चानन्दपूर्वकम् ।
चक्षुर्निमेषकाले च ब्रह्मणः पतनं भवेत् ॥ ७९॥

तस्य प्रभावमतुलं वर्णितुं कः क्षमो विभो ।
भ्रूभङ्गलीलामात्रेण विष्णुकोटिं सृजेत्तु यः ॥ ३.८०॥

चराचरांश्च विश्वेषु देवान्ब्रह्मपुरोगमान् ।
मद्विधाः कति वा देवीः स्रष्टुं शक्तश्च लीलया ॥ ८१॥

परिपूर्णतमं स्वीड्यं वन्दे चानन्दपूर्वकम् ।
महान्विराड्यत्कलांशो विश्वसङ्घाश्रयो विभो ।
वन्दे चानन्दपूर्वं तं परमात्मानमीश्वरम् ॥ ८२॥

यं च स्तोतुमशक्ताश्च ब्रह्मविष्णुशिवादयः ।
वेदा अहं च वाणी च वन्दे तं प्रकृतेः परम् ॥ ८३॥

वेदाश्च विदुषां श्रेष्ठाः स्तोतुं शक्ताश्च न क्षमाः ।
निर्लक्ष्यं कः क्षमः स्तोतुं तं निरीहं नमाम्यहम् ॥ ८४॥

इत्येवमुक्त्वा सा दुर्गा रत्नसिंहासने वरे ।
उवास नत्वा श्रीकृष्णं तुष्टुवुस्तां सुरेश्वराः ॥ ८५॥

इति ब्रह्मवैवर्तपहराणे ब्रह्मखण्डे तृतीयाध्यायान्तर्गतं

प्रकृतिकृतं श्रीकृष्णस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । ब्रह्मखण्ड । अध्याय ३/७७-८४॥

brahmavaivartapurANa . brahmakhaNDa . adhyAya 3/77-84..

Proofread by PSA Easwaran

*Prakritikritam Shri Krishna Stotram*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*